# ॥ अर्धनारीश्वराष्टोत्तरशतनामावलिः ॥

चामुण्डिकाम्बायै नमः
श्रीकण्ठाय नमः
पार्वत्यै नमः
परमेश्वराय नमः
महाराज्ञ्यै नमः
महादेवाय नमः
सदाराध्यायै नमः
सदाशिवाय नमः
शिवार्धाङ्ग्यै नमः
शिवार्धाङ्गाय नमः। १०
भैरव्यै नमः
कालभैरवाय नमः
शक्तित्रितयरूपाढ्यायै नमः
मूर्तित्रितयरूपवते नमः
कामकोटिसुपीठस्थायै नमः
काशीक्षेत्रसमाश्रयाय नमः
दाक्षायण्यै नमः
दक्षवैरिणे नमः
शूलिन्यै नमः
शूलधारकाय नमः। २०
ह्रीङ्कारपञ्जरशुक्यै नमः
हरिशङ्कररूपवते नमः
श्रीमद्गणेशजनन्यै नमः
षडाननसुजन्मभुवे नमः
पञ्चप्रेतासनारूढायै नमः
पञ्चब्रह्मस्वरूपभृते नमः
चण्डमुण्डशिरश्छेत्र्यै नमः
जलन्धरशिरोहराय नमः
सिंहवाहायै नमः
वृषारूढाय नमः। ३०
श्यामाभायै नमः
स्फटिकप्रभाय नमः
महिषासुरसंहर्त्र्यै नमः
गजासुरविमर्दनाय नमः
महाबलाचलावासायै नमः
महाकैलासवासभुवे नमः
भद्रकाल्यै नमः
वीरभद्राय नमः
मीनाक्ष्यै नमः
सुन्दरेश्वराय नमः। ४०
भण्डासुरादिसंहर्त्र्यै नमः
दुष्टान्धकविमर्दनाय नमः
मधुकैटभसंहर्त्र्यै नमः
मधुरापुरनायकाय नमः
कालत्रयस्वरूपाढ्यायै नमः
कार्यत्रयविधायकाय नमः
गिरिजातायै नमः
गिरीशाय नमः

वैष्णव्यै नमः
विष्णुवल्लभाय नमः। ५०
विशालाक्ष्यै नमः
विश्वनाथाय नमः
पुष्पास्त्रायै नमः
विष्णुमार्गणाय नमः
कौसुम्भवसनोपेतायै नमः
व्याघ्रचर्माम्बरावृताय नमः
मूलप्रकृतिरूपाढ्यायै नमः
परब्रह्मस्वरूपवते नमः
रुण्डमालाविभूषाढ्यायै नमः
लसद्रुद्राक्षमालिकाय नमः। ६०
मनोरूपेक्षुकोदण्डायै नमः
महामेरुधनुर्धराय नमः
चन्द्रचूडायै नमः
चन्द्रमौलये नमः
महामायायै नमः
महेश्वराय नमः
महाकाल्यै नमः
महाकालाय नमः
दिव्यरूपायै नमः
दिगम्बराय नमः। ७०
बिन्दुपीठसुखासीनायै नमः
श्रीमदोङ्कारपीठगाय नमः
हरिद्राकुङ्कुमालिप्तायै नमः
भस्मोद्धूलितविग्रहाय नमः
महापद्माटवीलोलायै नमः
महाबिल्वाटवीप्रियाय नमः
सुधामय्यै नमः
विषधराय नमः
मातङ्ग्यै नमः
मकुटेश्वराय नमः। ८०
वेदवेद्यायै नमः
वेदवाजिने नमः
चक्रेश्यै नमः
विष्णुचक्रदाय नमः
जगन्मय्यै नमः
जगद्रूपाय नमः
मृडान्यै नमः
मृत्युनाशनाय नमः
रामार्चितपदाम्भोजायै नमः
कृष्णपुत्रवरप्रदाय नमः। ९०
रमावाणीसुसंसेव्यायै नमः
विष्णुब्रह्मसुसेविताय नमः
सूर्यचन्द्राग्निनयनायै नमः
तेजस्त्रयविलोचनाय नमः
चिदग्निकुण्डसम्भूतायै नमः
महालिङ्गसमुद्भवाय नमः
कम्बुकण्ठ्यै नमः
कालकण्ठाय नमः
वज्रेश्यै नमः
वज्रिपूजिताय नमः। १००

त्रिकण्टक्यै नमः
त्रिभङ्गीशाय नमः
भस्मरक्षायै नमः
स्मरान्तकाय नमः
हयग्रीववरोद्धात्र्यै नमः
मार्कण्डेयवरप्रदाय नमः
चिन्तामणिगृहावासायै नमः
मन्दराचलमन्दिराय नमः
विन्ध्याचलकृतावासायै नमः
विन्ध्यशैलार्यपूजिताय नमः। ११०
मनोन्मन्यै नमः
लिङ्गरूपाय नमः
जगदम्बायै नमः
जगत्पित्रे नमः
योगनिद्रायै नमः
योगगम्याय नमः
भवान्यै नमः
भवमूर्तिमते नमः
श्रीचक्रात्मरथारूढायै नमः
धरणीधरसंस्थिताय नमः। १२०
श्रीविद्यावेद्यमहिमायै नमः
निगमागमसंश्रयाय नमः
दशशीर्षसमायुक्तायै नमः
पञ्चविंशतिशीर्षवते नमः
अष्टादशभुजायुक्तायै नमः
पञ्चाशत्करमण्डिताय नमः
ब्राह्म्यादिमातृकारूपायै नमः
शताष्टेकादशात्मवते नमः
स्थिरायै नमः
स्थाणवे नमः। १३०
बालायै नमः
सद्योजाताय नमः
उमायै नमः
मृडाय नमः
शिवायै नमः
शिवाय नमः
रुद्राण्यै नमः
रुद्राय नमः
ईश्वर्यै नमः
ईश्वराय नमः। १४०
कदम्बकाननावासायै नमः
दारुकारण्यलोलुपाय नमः
नवाक्षरीमनुस्तुत्यायै नमः
पञ्चाक्षरमनुप्रियाय नमः
नवावरणसम्पूज्यायै नमः
पञ्चायतनपूजिताय नमः
देहस्थषट्चक्रदेव्यै नमः
दहराकाशमध्यगाय नमः
योगिनीगणसंसेव्यायै नमः
भृग्वादिप्रमथावृताय नमः। १५०
उग्रतारायै नमः
अघोररूपाय नमः

शर्वाण्यै नमः
शर्वमूर्तिमते नमः
नागवेण्यै नमः
नागभूषाय नमः
मन्त्रिण्यै नमः
मन्त्रदैवताय नमः
ज्वलज्जिह्वायै नमः
ज्वलन्नेत्राय नमः। १६०
दण्डनाथायै नमः
दृगायुधाय नमः
पार्थाञ्जनास्त्रसन्दात्र्यै नमः
पार्थपाशुपतास्त्रदाय नमः
पुष्पवच्चक्रताटङ्कायै नमः
फणिराजसुकुण्डलाय नमः
बाणपुत्रीवरोद्धात्र्यै नमः
बाणासुरवरप्रदाय नमः
व्यालकञ्चुकसंवीतायै नमः
व्यालयज्ञोपवीतवते नमः। १७०
नवलावण्यरूपाढ्यायै नमः
नवयौवनविग्रहाय नमः
नाट्यप्रियायै नमः
नाट्यमूर्तये नमः
त्रिसन्ध्यायै नमः
त्रिपुरान्तकाय नमः
तन्त्रोपचारसुप्रीतायै नमः
तन्त्रादिमविधायकाय नमः
नववल्लीष्टवरदायै नमः
नववीरसुजन्मभुवे नमः। १८०
भ्रमरज्यायै नमः
वासुकिज्याय नमः
भेरुण्डायै नमः
भीमपूजिताय नमः
निशुम्भशुम्भदमन्यै नमः
नीचापस्मारमर्दनाय नमः
सहस्राराम्बुजारूढायै नमः
सहस्रकमलार्चिताय नमः
गङ्गासहोदर्यै नमः
गङ्गाधराय नमः। १९०
गौर्यै नमः
त्रिलोचनाय नमः
श्रीशैलभ्रमराम्बाख्यायै नमः
मल्लिकार्जुनपूजिताय नमः
भवतापप्रशमन्यै नमः
भवरोगनिवारकाय नमः
चन्द्रमण्डलमध्यस्थायै नमः
मुनिमानसहंसकाय नमः
प्रत्यङ्गिरायै नमः
प्रसन्नात्मने नमः। २००
कामेश्यै नमः
कामरूपवते नमः
स्वयम्प्रभायै नमः
स्वप्रकाशाय नमः

कालरात्र्यै नमः
कृतान्तहृते नमः
सदान्नपूर्णायै नमः
भिक्षाटाय नमः
वनदुर्गायै नमः
वसुप्रदाय नमः। २१०
सर्वचैतन्यरूपाढ्यायै नमः
सच्चिदानन्दविग्रहाय नमः
सर्वमङ्गलरूपाढ्यायै नमः
सर्वकल्याणदायकाय नमः
राजराजेश्वर्यै नमः
श्रीमद्राजराजप्रियङ्कराय नमः२१६

॥ इति श्री-स्कन्दपुराणे श्री-अर्धनारीश्वराष्टोत्तरशतनामावलिः सम्पूर्णा ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Ardhanarishvara_Ashtottara_Shatanamavali.
generated on **June 27, 2026**
Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits